Topic 52

# क्रोष्टृ शब्द रूप

तृज्वत् क्रोष्टुः ।

असम्बुद्धौ सर्वनामस्थाने परे क्रोष्टुशब्दस्य स्थाने 'क्रोष्टृ' शब्दः प्रयोक्तव्य इत्यर्थः

ऋतो ङि-सर्वनामस्थानयोः ।

ऋतोऽङ्स्य गुणो ङौ सर्वनामस्थाने च । इति प्राप्ते -

ऋदुशनस्पुरुदंसोऽनेहसां च ।

ऋदन्तानाम् उशनसादीनां चानङ् स्यादसम्बुद्धौ सौ ।

अप्-तृन्-तृच्-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्तॄणाम् ।

अबादीनामुपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने

क्रोष्टा, क्रोष्टारौ, क्रोष्टारः । क्रोष्टारम्, क्रोष्टून् ।

विभाषा तृतीयादिष्वचि ।

अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत् ।

क्रोष्ट्रा, क्रोष्ट्रे ।

ऋत उत् ।

ऋतो ङसि-ङसोरति उद् एकादेशः । रपरः

P.T.O